संस्कृतवर्षस्मृतिग्रन्थमाला
अप्रकाशितपाण्डुलिपिग्रन्थप्रकाशनम् - ६
प्रधानसम्पादकः - वेम्पटि कुटुम्बशास्त्री

आचार्यानन्दानुभवकृतः

# पदार्थतत्त्वनिर्णयः

सम्पादकः
शुद्धानन्दपाठकः

राष्ट्रियसंस्कृतसंस्थानम्
मानितविश्वविद्यालयः
नवदेहली

**Samskrita Varsha Smriti Grantha Mala**
**Unpublished Manuscript Publication - 6**
**General Editor - Vempaty Kutumba Sastry**

# PADĀRTHATATTVANIRṆAYAḤ

OF

## ĀNANDĀNUBHAVAḤ

*Edited By*

Shuddhanand Pathak

**Rashtriya Sanskrit Sansthan**
**New Delhi**

॥ शिवाय गुरवे नमः॥

# भूमिका

आस्तिकनास्तिकभेदेन प्रविभक्तानि न्यायवैशेषिकादीनि सन्ति बहूनि दर्शनानि परमतत्त्वनिरूपणार्थं प्रवृत्तानि।

सत्स्वपि बहुषु दर्शनेषु वेदान्तदर्शनस्य सर्वोत्कर्षं मनीषिणः सङ्गिरन्ते। तथा चोक्तं गौडब्रह्मानन्देन **सर्वेषां दर्शनानां वेदान्तदर्शनमेव दर्शनीयतमं दर्शनमिति**[1]। यद्यपि नास्तिकैर्वेदान्तदर्शनस्य गरीयस्त्वं नाङ्गीक्रियते, स्वस्वमतसम्प्रदायादभिनिवेश-वशीभूताः स्वस्वदर्शनेष्वेव महीयस्त्वं पश्यन्ति, न केवलं नास्तिकाः एव किन्त्वास्ति-केष्वपि स्वस्वसम्प्रदायाऽभिनिवेशिनः सम्प्रदायप्रवर्तकस्य मतमेव साग्रहं गृह्णन्ति, तथापि नास्तिकानां दार्शनिकविचारकाणामल्पीयस्त्वात् तद्दर्शनानामद्यत्वे विरलप्रचारत्वाच्च न तदुत्कर्षः प्रगतिमार्गमवलम्बते। आस्तिकैस्तु सर्वैरपि वेदप्रामाण्याभ्युपगमात् स्वत एव वेदान्तानां मुख्यत्वमापतति। एवं स्थिते वेदान्तदर्शनस्य वेदानुगामित्वाद् गरीयस्त्वं तटस्थैः शक्यते एव ज्ञातुं यतः "नास्तिको वेदनिन्दकः" इति मनुवचनादास्तिकैः वेदाः नैव अपोहितुं शक्यन्ते।

यदि कश्चिदेवं ब्रूयाद् वेदानां प्रामाण्यं सर्वैः स्वीक्रियतां किमेतावता समायातं वेदान्तदर्शनबलीयस्त्वे इति? तत्रोच्यते, वेदान्तो हि न स्वतन्त्रं किञ्चिद् दर्शनं किन्तु वेदार्थस्वरूपविचार एव। वेदानामन्तो हि वेदान्तः। तथा चोक्तं वेदान्तसारकृता–

**[2]वेदान्तो नामोपनिषत् प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च**

अयमर्थः मुख्यवृत्त्या उपनिषदः एव वेदान्ताः। वेदानामन्तिमभागत्वाद् वेदप्रति-पाद्यसिद्धान्तप्रतिपादकत्वात् सकलवेदपर्यवसानाच्च उपनिषदः एव वेदान्ताः। तदुपयोगित्वाद् 'लाङ्गलं जीवनमि'तिवल्लक्षणया शारीरिकसूत्राण्यपि वेदान्ता इति। वेदान्तसूत्राणि च उपनिषदुक्तपरमार्थतत्त्वकुसुमग्रथनपराणि प्रसिद्धानि। तत्रोपनिषद्-गतानां सन्दिग्धानां वाक्यानामर्थनिर्णयकृतः, उपनिषत्प्रतिपादिताः सिद्धान्ताश्च विचार्य निर्णीताः। उपनिषदस्तु वेदानामन्तिमो भाग इति। वेदत्वादपौरुषेयाः अनादयश्च मीमांसकमतेन। सर्गादौ परमेश्वरेण प्रणीताः इति नैय्यायिकमतेऽपि उपनिषदां वेदत्वमविप्रतिपन्नमेव। एवञ्च 'नास्तिको वेदनिन्दक' इति पूर्वोक्तमनुवचनानुसारेण आस्तिकैः वेदवचनापलापासम्भवेनोपनिषदां महीयस्त्वं तदर्थविचारकवेदान्तदर्शनस्य दर्शनीयतमत्वञ्च सिद्धं भवति।

---

1. सिद्धान्तबिन्दुटीका।
2. वेदान्तसारः

# विषयानुक्रमणिका


| विषयः | पृष्ठसंख्या |
|---|---|
| शुभसन्देशः | v |
| आमुखम् | vii-viii |
| भूमिका | ix-xxx |
| **प्रथमः परिच्छेदः (पूर्वपक्षः)** | **1-55** |
| मङ्गलाचरणम् | 1 |
| वैशेषिकमतप्रतिपादनम् | 2 |
| षट्पदार्थलक्षणनिरूपणम् | 3 |
| द्रव्यवर्णनम् | 3 |
| गुणवर्णनम् | 4 |
| कर्मवर्णनम् | 4 |
| सामान्यनिरूपणम् | 4 |
| विशेषनिरूपणम् | 5 |
| समवायनिरूपणम् | 5 |
| शक्तेः द्रव्यान्तरत्वखण्डनम् | 5 |
| व्याप्तिस्वरूपम् | 5 |
| साधर्म्यादिनिरूपणम् | 6 |
| पृथिवीनिरूपणम् | 9 |
| जलनिरूपणम् | 11 |
| तेजसो निरूपणम् | 11 |
| वायुनिरूपणम् | 12 |

संयोगे सति तयोः [1]सजातीयाभ्यामेवेतराभ्यां संयोगे पार्थिवाप्यद्व्यणुकद्वयमुत्पद्यते। तदनन्तरं पार्थिवाणुनाप्यद्व्यणुकस्य संयोगो जायते। तथाप्यपरमाणुना पार्थिवद्व्यणुकस्यापि संयोगो जायते। प्रमाणञ्चात्र प्रत्यक्षयोग्ये तावत्परिशेषः। तन्तुसंयुक्तं हि केशादिपटेन संयुक्तं दृश्यते। तत्र कर्मणोऽभावात् तन्तुकेशसंयोग एव कारणं सिद्धम्। अतः उक्तविधपरमाणुद्व्यणुकसंयोगः कारणाकरणसंयोगारभ्यः [2]कर्माजन्यत्वे सति संयोगत्वात् सम्प्रतिपन्नवदिति। न चाजः संयोगोऽस्ति, तन्मानाभावादिति। नानैकान्तता। यत्तूदयनेनोक्तं पार्थिवद्व्यणुकमाप्येन परमाणुना संयुज्यते, तदकार्यत्वे सति तत्संयोगिकार्यत्वात् यथा पटस्तुर्येति। तदसत्; दृष्टान्तस्य साध्यसाधनशून्यत्वात्। नाशस्तु सर्वसंयोगस्य एकार्थसमवेताद्विभागात्, क्वचिच्चाश्रयनाशात्।

यदि[3] हि संयुक्तं द्रव्यमक्रियमेव [4]अवयविक्रियाविभागादिक्रमेण[5] नश्यति। ततस्तदनन्तरतन्नाशात्[6] तदाश्रितसंयोगनाशः।

## विभागस्य निरूपणम्



विभागस्य विभक्तव्यवहारासाधारणकारणता वैधर्म्यं, प्रमाणं त्विदम् अस्माद्विभक्तमिति प्रत्ययः। तच्छब्दव्यवहारस्तु न रूपादिनिमित्तः सम्भवतीति परिशेषाद्गमकः। तथाशब्दादिहेतुः विभागः शब्दादिनाऽवगन्तव्यः। वंशदलविभागात्तावच्छब्दोत्पत्तिः प्रसिद्धा। तथा कारणविभागात् कार्यविभागो जायते। लक्षणन्तु संयोगघातको गुणो विभाग इति। संयोगनाश एव विभाग इति चेन्न, आश्रयनाशात्संयोगनाशे विभागबुद्ध्यभावात्। सतोः संयोगनाशो विभाग इति चेन्न, विभागस्य सावधितया प्रतीतेः। नह्यभावः सावधितया प्रतीयते। स[7] त्रिविधोऽन्यतरकर्मजो उभयकर्मजो विभागश्चेति। तत्र द्वयोः संयोगवदुदाहरणम्। तृतीयस्तु द्विविधः कारणमात्रविभागजः कारणाकारणविभागश्चेति। तत्र कारणमात्रविभागजस्तावदेवं जायते, यदा हि पटावयवकर्म पटावयवान्तराद् विभागं जनयति, तदनन्तरं द्रव्यारम्भकसंयोगनाशः ततः पटनाशः,

---

1. सजातीया एवेतराभ्याम् क।
   सजातीया एवंतराभ्यां ख, ग।
2. कर्मजन्यत्वे इति पाठः ग।
3. यदा ख, ग।
4. अवयवक्रि० ख, ग।
5. तन्नाशात्, इति नास्ति पाठः ग।
6. वंशद्वयवि. ग।
7. स च इति पाठः ख।






**Rashtriya Sanskrit Sansthan**

56-57, Institutional Area, Janakpuri,
New Delhi 110 058